नानृतं ब्रूयादेष धर्म्मः सनातन” इति मनुना मिथ्याभूतं प्रियवाक्यमपि निषिद्धं तत्र साक्ष्यनृतभाषणस्यातीवनिन्द्यता यथा “यावतो बान्धवान् यस्मिन् हन्ति साक्ष्येऽनृतं वदन्निति” “एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेदिति” च मनुः। “ये च पापकृतां लोका महापातकिनां तथा। अग्निदानाञ्च ये लोकाः ये च स्त्रीबालघातिनाम्। स तान् सर्व्वानवाप्नोति यः साक्ष्यमनृतं वदेदिति” या०। “ब्रूहि साक्षिन्! यथातत्त्वं लम्बन्ते पितरस्तव। तव वाक्यमुदीक्ष्यैवमुत्पतन्ति पतन्ति च॥ नग्नो मुण्डः कपाली च भिक्षार्थं क्षुत्पिपासितः। अन्धः शत्रुकुले गच्छेद् यस्तु साक्ष्यनृतं वदेत्॥ पञ्च कन्यानृते हन्ति दश हन्ति गवानृते। शतमश्वानृते हन्ति, सहस्रं पुरुषानृते॥ वशि०स०। क्वचिद्विषये तदपवादः। “वर्णिनां हि बधो यत्र तत्र साक्ष्यनृतं वदेदिति” या०। “प्राणात्यये सर्व्वधनापहारे विप्रस्य चार्थे ह्यनृतं वदेच्च। विवाहकाले रतिसंप्रयोगे पञ्चानृतान्याहुरपातकानि भा०क०प०। कृषिकर्म्मणि न०मे०।

**अनृतक** त्रि० अनृते प्रसृतः कन्। असत्यकथनरते “लुब्धा अनृतकाश्चैव तिष्ये जायन्ति भारत”! भा० भी०प०।

**अनृतवादिन्** त्रि० अनृतं वदति वद—णिनि। मिथ्यावादिनि

**अनृतु** पु० न ऋतुः वर्षादिकालः। स्वस्वयोग्यवर्षर्त्तुभिन्ने काले “तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने” इति मनुः। नास्ति ऋतुः स्त्रीपुष्पविकाशो यस्मिन् काले। स्त्रीपुष्पविकाशशून्ये काले पु०। “अनृतावृतुकाले च मन्त्रसंस्कारकृत् पतिरिति” मनुः।

**अनृशंस** त्रि० न नृशंसः विरोधे न०त०। अहिंस्रे दयालौ। तस्य भावः युवादि० अण् आनृशंसम्, ब्राह्मणा० ष्यञ् आनृशंस्यञ्च दयायाम्।

**अनेक** त्रि०न एकः एकभिन्नतया उत्सर्गतः बहुवचनान्तता। बहुसंख्यकेषु। “अनेकानि सहस्राणि कौमारब्रह्मचारिणा”मिति मनुः। “पतन्त्यनेके जलधेरिवोर्म्मयः” इति माघः “अनेके सेवन्ते भवदधिकगीर्वाणनिवहानिति” श्यामास्तोत्रम्। एकशब्दस्य सर्वनामत्वेन नञ्तत्पुरुषे तद्भिन्नवाचकतया गौणत्वेऽपि अतच्छब्दवत् सर्वनामकार्य्यं तेन अनेके इति, अनेकेषामिति, अनेकत्रेत्यादि। एवञ्च एकशब्दस्य समाहारद्विगुत्वनिषेधादनेकशब्दस्य बहुसंख्यावाचकत्वेऽपि न समाहारः। तेन अनेकराजन्यरथाश्वसङ्कुलमिति किरा० समाहारे अनेकराजन्यरथाश्वीति स्यात्। “यत्रानेकविधमान्तर्य्यं तत्र स्थानत आन्तर्य्यं बलीय इति” परिभा० सि०कौ०। “अनेकपितृकानान्तु पितृतो भागकल्पनेति” याज्ञ०। “अनेकबाहूदरवक्त्रनेत्रमिति” “अनेकजन्मसंसिद्धस्ततो याति परां गतिमिति” च गीता नास्ति एकः “द्व्येकयोर्द्विवचनैकवचने” इतिवत् एकत्वं यत्रेति बहुव्रीहौ अनेकशब्दस्य एकवचनान्ततापीष्यते। “अनेकमन्यपदार्थे” इति पा०सू०। “आकाशमेकं हि यथा घटादिषु पृथग्भवेत् “तथात्मैकोऽप्यनेकश्चेति” याज्ञ०। “अनेकमाश्रितं लिङ्गमिति” सा०का०। “एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा। साधारणे समानेऽल्पे संख्यायाञ्च प्रयुज्यते” इत्युक्तेष्वर्थेषु एकशब्दस्य वृत्तेः तदुक्तार्थभिन्ने त्रि०। तत्र च संख्यान्यर्थे एव बहुवचनान्ततान्यत्र यथेष्टतेति मनो०। उत्करादि० भवार्थे छ। अनेकीयः तद्भवे त्रि०। भावे ब्रा० ष्यञ्। आनैक्यं बहुत्वे न०।

**अनेकज** पु० अनेकवारं जायते जन—ड वृत्तौ संख्यावाचकस्य सुजर्थता। द्विवारं जाते पक्षिणि, तस्य गर्भाण्डाभ्यां जातत्वेन द्विवारजाततया द्विजत्वादनेकजत्वम्। ५त०। बहुभ्यो जाते त्रि०।

**अनेकधा** अव्य० अनेक+प्रकारे धाच्। बहुप्रकारे “अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैरिति” स्मृतिः। “तत्रैकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधेति” गीता।

**अनेकप** पु० अनेकाभ्यां मुखशुण्डाभ्यां पिबति पा-क। द्विपे हस्तिनि। “मालवनाथोऽप्यनेकानेकपयूथसनाथः” द०कु०।

**अनेकमूर्त्ति** पु० अनेका लोकानामनुग्रहाय अवतारेषु नानाविधा मूर्त्तयोऽस्य। परमेश्वरे “अनेकमूर्त्तिरव्यक्त” इति विष्णुसह०।

**अनेकरूप** पु० अनेकानि रूपाण्यस्य। बहुरूपे परमेश्वरे “रूपं रूपं प्रतिरूपो बभूवेति” श्रुतौ तस्य बहुरूपत्वोक्तेस्तथात्वम्। नानाविधरूपयुक्तमात्रे पटादौ त्रि०।

**अनेकलोचन** पु० अनेकानि लोचनानि यस्य। इन्द्रे, परमेश्वरे च “सहस्राक्षः सहस्रपादिति” श्रुतौ अनेकबाहूदरवक्त्रनेत्रमिति” गीतायाञ्च तस्य अनेकनेत्रत्वोक्तेस्तथात्वम्

**अनेकवर्णसमीकरण** न० अनेकवर्णाः अज्ञातविशेषसंख्यकानेकराशयः समीक्रियन्ते ज्ञातसंख्यकसमतया क्रियन्ते यत्र। बीजभेदे यथोक्तं भास्करवीजगणिते “अथानेकवर्णसमीकरणं वीजम्। तत्र सूत्रं सार्द्धवृत्तत्रयम्।” “आद्यं वर्णं शोधयेदन्यपक्षादन्यान् रूपाण्यन्यतश्चाद्यभक्ते। पक्षेऽन्यस्मिन्नाद्यवर्णोन्मितिः स्याद्वर्णस्यैकस्योन्मितीनां बहुत्वे॥ समीकृत-